This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit. The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

M-151

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M 151 विषय काव्य. (लक्षि)
नाव. गीतगौरीपति (अक्षयदीप गीतिकाव्य)
लेखक/लिपीकार कविराज भानुदत्त MSS
पृष्ठ _____ काळ शके 1923 पूर्ण/अपूर्ण

(51-N

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

(63)

श्रीगणेशशारदागुरुभ्योनमः श्रीभवानीशंकरा
भ्यांनमः संध्यानृत्यविधौ भुजंगमपतेर्गीतामृतंश्रु-
णवतः प्रत्यक्षस्खलितप्रमोदसलिलस्रोमतनौसर्प-
ति मौलेरुत्पथगा किमुन्नि पथगा जोलति शंकाजुषो
द्वेषस्यत्रिपुरांतकस्य चकितव्यालोकितंपातुवः १
भानोर्गतिं सुधास्मीतं शंभोर्डमरुडिंडिमः विदुषां
रसनारंगभूमौ भारनिगृत्यतां २ मालवगौडीरागे
णगीयते भ्रमसिजगतिसकलेप्रतिलवमविशेषं
शमयितुमिवजनखेदमशेषं पुरहरधृतपवनशरीर
जयभुवनाधिपते ध्रुवपद प्रवहसिमधुमथनंनवनी-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रदललितं मरकतमणिमिववक्षसिकलितं पुरहरधृत जलधिशरीर जयभुवनाधिपते २ क्षीरसिंधुलहरी रुचिरंरुचिजालं परमधामकिमुवहसिविशालं पुरहर धृतहिमकररूप जयभुव० ३ घनघनतिमिरचयंचिरम पगतशंकं हरसिलग्नमिवजगतीपंकं पुरहरधृतदिनकर रूप जयभुव० ४ कलयसिदेवकुलं हविषासानंदं घनइवपयसाचातकवृंदं पुरहरधृतयजमानशरीर जयभुव० ५ वहसिग्रहनिवहंपरिकृतपरितापं करुणतरोरिवकुसुमकलापं पुरहरधृतगगनाकार जय० ६ कपटकोलदशनेरचयसिसविलासं कुंददामगत

मधुकरभासं पुरहरधृतधरणीकाय जयभुवना० ७ वहसिशिरवानिचयंहिमनिकरहरं प्रेमतरोरिवशाखा निकरं पुरहरधृतहुतवहदेहजयभुवनाधिपते ८ भानुदत्तरचितंशशिशेखरगीतं भवतुश्रवणयुगुलपुटपीतं पुरहरधृतवसुमितरूप जयभुवनाधिपते ९ अंतश्चारिणि शैत्यकारिणिसुधा धाराचमत्कारिणि ध्वांताकर्षिणि हव्यवर्षिणि नटन्नक्षत्रविद्योतिनि माया कच्छपपृष्ठरोहिणिसुराधीशद्रुमद्रोहिणि क्रीडाकल्पितवेषधारिणिसुरारातौमनोमज्जतु १ केवाकेलिक लाकलापकुशलाः क्रीडंतिनोकामिनः कांताकापि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गी० २

कदापिकापिशिरसांकेनापिकिंधार्यते गंगामूर्ध्निदधासिनापिवहसिव्रीडानधत्तेभयं किंवाबाल्यमिदं निगद्यगिरिजाकुंजांतरंनिर्ययौ २ अभान्तरगेण० सुरारिपुनरकविदारणभवतारणाए किंकरपाशकृपाण जयशिवसर्वगते १ अभिमतफलपरिदायक सुरनायकाए मुनिजनवितरितनाक जयशिवसर्वगते २ दश करमंडलमंडित भवरवंडिताए फणिपतिभूषणभास जयशिव० ३ तुहिननिचयरुचिसुंदर हुतपुंदराए रति सुखविरहितमारजयशिव० ४ त्रिपुरदहनहरिसा यक शुभदायकाए करवरलसितपिनाक जयशिवस-

गौ० शिव २

वर्गते ५ विधिविधुशतमखवंदित मुनिनंदिताए ग रलसुरंजितकंठ जयशिव० ६ त्रिभुवनमिदमनुपाल यकरुणालयाए भूतिविभूषितकायजयशिव० ७ भानुदरकविभवसुतंसुतरामवाए गणपतिषण्मुख शाय जयशिव० ८ ७ माधवीमुकुलामोदभ्रमो दमभिभ्रती विजयांप्रणयादूचेगौरीमूरीकृतस्मरां १ दिविपश्यमघोसंधिंतथात्तस्यमहोत्सवं विधेहिनर्मिता नंगैरपांगैस्तोरणस्रजं २ दृष्टिरस्यद्विरेफस्यकुंदे मुदमुदंचति अपांगोगंतुमोरेभेकिंनुमाकंदकाननं ३ समीरस्यमलीमतल्लीदिदृक्षा सिसृक्षारसालशुगा-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गी० २ नांस्मरस्य द्विरेफस्यचित्र ध्वनीनांशिशिक्षा घिविक्षा गो०

पुनःपंचमानांपिकस्य ४ आशारज्जुधुनर्तयन् हिमक
रंकामोरगंरवेरुयन् हासंकुंजमहीरुहस्यजनयन् मूकं
पिकंवादयन् बंधन् कामिमनः समीरणरथं निर्घटि-
कंचालयन् जानीमोमधुरैंद्र जालिकयुवा दिक्चक्र
माक्रामति ५ वसंतराजेगणगीयते चंपकचर्चितचा
रुपमुदंचितकेसरकृततूणीरं मधुकरनिकरकठोरक-
वचचयपरिचितचारुशरीरं १ जनुरनुरंजयपश्यव
संतं विकचबकुलकुल संकुलकानन कुसुममिषेण शिव
हसंतं १ ध्रु० सरसिजसौरभसुभगसमीरण समुदि २.

तपथिकविषादं कोकिलकलरव कपट लुतानति
विरचितमणितनिनादं २ जनुरनुरंजय० विक-
सित किंशुककुसुमममसमशर विशिरव विलासनि
दानं युवतिमानमधुपानसमुन्मत्तरसनामिव विभ्रा
णं जनुरनुरंजय० ३ अविरलमदजलसिंधुर
बंधुरकुसुमिलबालतमालं त्रुटितरजनी घटिका
विघटितकण कोमलमधुकरजालं जनुरनुरंजय०
४ करुणलवंगरसालविचित्रित विविधकुसुम
कमनीयं मदनापणमिव दिशिदिशि विनिहित ना
नामणिरमणीयं जनुरनुरंजय० ५ रतिपतिरथ-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पतदारतारतर केतकमंजुनिकुंजं स्मरनटनापतित नट गौ०
मुकुटमणिपटुनरपाटलपुंजं जनुरनुरंजय० ६ या
मवलीयुवतीतनुकर्षणा शिथिलितदिनकरयानं निर
हिविदारणबहलश्रमविहितहिमानीपानं जनुर
नुरंजय० ७ भानुदत्तकविकृतमधुवर्णनमनुलक्ष्य
संकाशं जनयतुगौरी नयननिषेवितपुरहरहृदयवि
काशं जनुरनुरंजयपश्यवसंतं० ८ ४ २
आयातस्यवसंतवासरमहोत्साहंसमालोकितुं भवतः
सांद्रकुतूहलस्यवसनंपीतंविधातुंरतिः काश्मीरंकि शिव
मुकंडितंकुलवती क्रीडानिकुंजोदरे व्याकीर्णानिर- ४

जांसितस्यपरितः आयःपरागोत्कराः १ इतिश्रीकवि
भानुदत्तविरचितेगीतगौरीपतौ महाकाव्येप्रथमःसर्गः १
यक्षोवासपुरीचरःसहचरो दौवारिकोवेपथु श्चिंतांतः
पुरचारिणीपरिभवोमंत्रीधरित्रीतनुः भ्रांतिःसैनिक
मेणकान्तरदृशोबाष्पोदबिंदूत्करैः संतापस्यभनोभ
वेनविदधेराज्याभिषेकोत्सवः १ उन्मीलत्कलिका
मृणालललिकाशैत्यायसंयोजिता हारभ्रांतिमुरीच
कारहृदयेतस्याःकुरंगीदृशः स्फूर्जत्तापहुताशराशि
भरिताद्रंतः कटाहाहसन् हर्तुंहंतकिमुस्मरेण निदधे
संदंशिकाराजती २ मनसोविषयःकांतःसंतापोवि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

षयस्तनोः चक्षुषोविषयस्तस्याबाष्पधारैवकेवलं ३ मलयगंधवहैर्नलिनीरजः प्रकरदंशुरिलैदुरिलैरिव परिचितामभितापविमूर्छितां प्रियसखीसुमुखीमिदमब्रवीत् ४ रामगरीरागेणगीयते सकुतुकसरभसस्मितविरचितबहुविधरतिरसरंगं मुकुलितविकसितमुहुरावर्त्तितनर्त्तितनयनतरंगं प्रियसखिकिमुरसिवहसिमहेशं हिमकरकिरणकलापकरंबित कैरवकोमलवेशं ध्रुवपदं १ त्रिदशतरंगवतीजितमविरलमुदयतिलोचननीरं वितनुतविभूतिभरादिवपांडुररुचिकिमुभवतिशरीरं प्रियसखि० २ लो

चनदहनगहनतमदीधितिरिवकलयसिसंतापं कंठविषमविषसंबंधादिवमोहंवहसिदुरापं प्रियसखिकिमु० ३ अनिलनविकटजटापटलद्युतिविलुठतिलहरिशैवालं प्रतिकृतिरिवहिमकिरणकलानामुदयतिबालमृणालं प्रियसखि० ४ अस्खलितस्यचकनककणादिवविसदृशवचनमनेकं प्रचलसिनिपतसिपश्यसिसचकितं मुहुरसिमलयजसेकं प्रियसखि० ५ विहितपतिव्रतधर्मवशादिवगणयसिरिपुमिवकामं वनमभिनिंदसिगिरिमनुनिंदसि निंदसिगृहमभिरामं प्रियसखि० ६ हृदयगतंहरमवलोकितुमिवनमसि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मुरवंशशिविंबं तदनुस्थिद्यसिपुलकसिमुद्यसिवह- गो०
सिकंपमविलंबं प्रियसखि० ७ भानुभणितमिति
विजयावहुविध कौतुककथनमुदारं शमयतुसकल
भुवनजनसमयिक दारुणदुरितविकारं प्रियसखिकि
मुरसि० ८ ७ विश्लेषदहनज्वालाजालाकुलि
तमानसा विजयामवदद्धैर्यादूरीकृत्यमनस्त्वपां १
अज्ञानत्रिपुरांतकस्यगणिता देवःस्मरोनिंदितो बंधू
नांवचनंविलंघितमतः पापस्यविच्छित्तये देहोभूशय-
नञ्चतांवितनुतेपाथोनिवासव्रतं चक्षुःस्त्रीकुरुतेमगो शिव
नुकुरुतेतापात्रिवासंव्रतं २ अष्ट० ४ अष्टाउरी ६

रांगेणगीयते किंभवामिभणामिवाकिमुताडितामदने
न कुत्रयामिकरोमिगाकिमुशीलिताकदेन शिवशि
वयैमेकुपितयानिंदितोगिरिशोपि ध्रु० १ किंहितं-
किमिवाहितंनविवेचितंहृदयेन शिक्षितंनचचारितं
नचचासरिधीनिचयेन शिवशिवमया० २ भावया
मितदास्यमुत्तमकांतिहास्यभरेण चंद्रविंबमिवोज्ज्व
लंनवचंद्रिकानिकरेण शिवशिवमया० ३ पाणिप
द्मगतोगतोमणिरेषकिंरचयामि दैवदत्तमवाप्यलेकि-
मितोपिवाकथयामि शिवशिवमया० ४ काननेभव
नेमहीधरमंडलेविचरामि तस्यलक्ष्म विश्वविलक्षण
स्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्यनसाम्यमाकलयामि शिवशिवमया० ५, वारिलोद-
यितोवचोनकृतंसखीनिचयस्य युक्तमेवललितोयतोमम
यालनाहृदयस्य शिवशिवमया० ६, तारकीयतिचंद्र,
शेखरणषनेत्रयुगस्य केसरीयति शंकरोममचित्तवारि
रुहस्य शिवशिवमया० ७ भानुकोविदणषगोचरमा
तनोतिचिराय शैलराजसुतानिवेदनमस्तुलोकहिताय
शिवशिवमया० ८ ७, अकरोःकिमुनेत्रशोणि
मानंकिमकार्षीःकरपद्मवानरोधं कलहंकिमथाःकुभा
रसज्ञेहितमर्थंनविदंतिदैवदृष्टाः १ अहोपंथानमुल्लृ
ज्यविपथेपदमर्पयन् हृदीश्वरोहृदिस्थितोहृदयंननि-

रुध्यवान् २, अष्टपदी ५ इतिश्रीभानुदत्तविरचिते
गीतगौरीपतौकलहनिवेदनंनामद्वितीयसर्गः २
आर्या प्रियसखिवसुधांशुवर्त्ती नायंपंकः कलंको
वा सिंहासनोपविष्टोजलधरकांतिःकृतांतोयं १
इदमर्थयामिकेवलमालीमृणालीनिवार्यतामुरसः
यदियंविरहहुताशनध्मापननालीधियंधत्ते २
धन्याशीरांगेणगीयते रतिरसविगलितमणिमयनूपुर
युगुलतरंगितताले फणिपतिविततफणावलिपरिकृतम-
णिगणविरचितमाले सायंसमयविहितनटवेषंचेतोमम
चिंतयतिमहेशं १ ध्रुवपदं हिमरुचिरुचिचयचंदनंच-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्तितदेहमुरीकृतरंगं ललितललाटविलोचनदीधि
तिकेसरसमुदयदंग सायंसमयविहित० २ तिल
किततुहिनकरं करकिशलय-वलयितपन्नगनाथं
प्रचलविलोचनचटुलचित्ररुचिरचितदीपसना
थं सायंसम० ३ अंजलिविगलितबकुलकुसुम
चयविरचितताराभासं सचकितनयनसदातन-
दर्शनविहितविपुलपरिहासं सायंसमय० ४
केलिनिकेतननिपतितमौक्तिकयोजितघर्घरघोषं
नंदितनंदीदिमधुरमुरुजध्वनिविहितहृदयपरितो
षं सायंसमय० ५ समधिकनर्तितगलितगजा-

जिनपरिणतजलदविकारं भ्रमिभरवितताजटापटल
द्युतिदर्शितताडिदाकारं सायंसमय० ६ सुरत-
टिनीजल-कमलदलस्रजमुदितहरिणतनुचीरं
फणिपतिचपलफणाव्यजनानिलशीतलसुभगशरी
रं सायंसमय० ७ भानुविहितमिलितपुरहरनर्तन
निगदितममृतसमानं जनयतु निखिलभुवनजन
चेतसि बहुविधसुखसंतानं सायंसमय० ८ छ
जीवेनतुलितंप्रेमसहमूढेनवेधसा लघुजीनोयथो
कंठंगुरप्रेमहृदिस्थितं १ स्वप्रकाशमनिर्बाध्यमा
त्मैक्यनिबर्तकं विकल्पातीतमानंदंप्रेमब्रह्मैवकेवलं २॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अष्टपदी ६ गौडीरागेणगीयते अभिनवयौवनभूषि तयादरतरलितलोचनतारं किंचिदुदंचितविहसितया चलदविरलपुलकविकारं सखिहेशंकरमुदितविलासं सहसंगमयमयानतयारतिकौतुकदर्शितहासं ध्रु० १ भुजगविभूषणभूषितयाकृति बहुविधचाटुकलापं हिमकरकिरणविलक्षितयामधुमधुरिमलसदभिलाषं सखिहेशंकर० २ अवनतवदनसरोरुहयात्तदि समुदितमुदितमनोज्ञं निचसनविनिहितकरतल यासचिरयोजितपाणिसरोजं सखिहेशंकर ३ कप टकोपपटुभाषितयामुखसरसिजचुंबनलोलं चकि तविलोलविलोचनयाकरपरिस्खलनीविनिचोलं सख सखिहेशंकर० ४ खरकरजक्षतकातरयास्मित मिक सितरुचिमुखचंद्रं चंचलकुंडलमंडितयाचलदलक यहसानंदं सखिहेशंकर० ५ कलितकपोलकलस्व नयाधरनिहितधरमनुचुंबनलोलं शिंजितरंजितनूपुरयाभृ तभुजयुगबंधनखेलं सखिहेशंकर० ६ श्रमजल शीकरशीतलितयाकरविहितव्यजनसमीरं घनतरनि श्वसितालसयापुनराननलिप्तपटीरं सखिहेशंकर० ७ भानुकवेरितिगोचरितं गिरितनयावचनमुदारं कलु यतुकृपयाकोमलयासुखसुभगमखिलसंसारं सखि

शिव ९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हेशंकर० ९ ७ वियोगयोगयोः श्रेयोवियो

गइतिमन्यते प्राणाःपंचापिसेवंतेकांलमलर-चारिणो

म् १ आशासुनिष्टतिकरोलिनकिंनुगाढमाश्लेषमेष

यदितत्रसखिप्रतीहि आशंकतेनयनयोरनयोरधी

रैर्नीरैर्ललाटदहनोपशमंपुरारिः २ इतिश्रीभानु

दत्तविरचितेगीतगोरीपतौ उत्कंठाकथनंनाम तृतीयः

सर्गः ७ ७ ७ ७ ७ ७ ७ ७

आकाशेभ्रमराभ्रमंति शबराःपुष्पस्त्रजोवागुराः कुंजे

किंशुककोरकोहुतवहःपापाधिकारःस्मरः जालंदिक्षु

सुधांशुकांतिनिकरश्येनोवसंतानिलश्चेतोमेहरिणः क

गच्छतुयतःसर्वत्रवामोविधिः १ वसंतरागेणगीयते

कलितकलंकममृतकरबिंबं रचयतिविषघटरुचिम

विलबं मधौमधुरेकिमुकरवाणिविधौविधुरे ध्रुवपदं

१ अंगारकभरितेवहसंती विकसदशोकलतांविह

संती मधौमधुरे० २ प्रसरतिकेतककुसुमसुधूली

किमुयमकासररुधिरपटधूली मधौमधुरे० ३ नथयति

मदनमहीपतिधाटी मभिनवविकसितकिंशुकघाटी

मधौमधुरे० ४ रिपुरिवमरुदपिचंदनसंगी यमपं-

जीवविधुमतिभृंगी मधौमधुरे० ५ आक्रमतेवनरि

णीकिमुदारा केतकउदयतिकंटकधारा मधौमधुरे०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

६ सैकत्मुष्णमिंदुकरजालं शिवशिवसकलमिहैव गौ०
मधौमधुरे० ७ भानुभणितमितिविगुणमनोज्ञावहतु
शुभंमेशैलतनूजा मधौमधुरे० ८ ७ ७ ७
सेहाइवविवर्धंते प्रियसखिवासंतिकादिवसाः ग्र
सरंतिहृंतपापाइवनवमाकंदपरिमलविकाराः १
दीर्घविनिश्वसंतीमनसिस्मरतिस्मरद्विषःस्मरणं
चिंताकवलितहृदयापुनरपिविजयानगात्मजांमूचे
२ विराडीरोणगीयते इयमियमालिमनोभवखे-
ला नियतानेवहिताहितवेला शैलसुतेसीदसिशं- शिव
भोदूरगते १ ध्रु० कुत्रनभवतिमदनशरपीडा किंतु ११

नविरमतिमनसिव्रीडा शैलसुते० २ विरचयपुर
हरनामस्मरणं तेनविनानहिसंकटतरणं शैलसुते
सीद० ३ किमितिविषीदसिविलपसिदीनं त्रिज-
गतिसकलमपित्वदधीनं शैलसुते० ४ कुपितभु-
जंगमभीषणभासं मुंचसिदर्पणमपिसत्रासं शैल
सुते० ५ चरणेनूपुरमपिनदधासि स्मरसिगडस्य
धियेवजहासि शैलसुते० ६ उरसिवहसिनच
विशमपिशीतं मनसिजभल्लधियाकिमुभीतं शैल
सुते० ७ वदतिभानुरितिसुहृदुपदेशं कुरुपतिरे
ष्यतिविसृजक्लेशं शैलसुते० ८ ७ अ० १ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विरहे विपिनच्छायां तन्वंगी किमुकाक्षसी एकस्य
विशसूत्रस्य च्छायातवमहीयसी १ नयनसलिल
बिंदुभिः स्खलद्भिर्भवतुपुरस्तवपिच्छलंनलावतू इ-
तिविकिरंति सैकलंशरीरे कुसुमधनुः किमुपांडि
मच्छलेन २ इतिश्रीभानुदत्तविरचितेगीतगौरी
पतौचतुर्थःसर्गः ४ ७ ७ ७ ७ ७
अविरलमधुकरवृंदमाकंदंवीक्ष्य विक्षुभिता
बालामुमूर्छदहनज्वालाजालाभितप्तेव १ सं-
वीक्ष्यविस्मितामेतां समेतांवाष्पधारया अनंत
स्वांतसंतापानालापानकरोत्सखी २ मैनाको

सौसमजनिसुतः कन्यकासेभवानी तेनाहैतं
जगतिविदधेभूधराणामधीशः लीनःसूनुर्जल
धिकुहरे बाष्पसिंधौगभीरे निर्मग्नाचेदहहक
ठिनाचित्तवृत्तिविधातुः २ विराडीरागेणगीयते
विरचयसिसखीजननयनसुखखंडनं परिहरसि
धरणीवलयहृदयमंडनं हाविधेकिमिहविविधं
त्रिभुवनरत्नमपकृतं ध्रु० १ हरसिमदनृपति
मौलिमुकुटमणिभूषणं वहसिसकलसारशृंगार
रसदूषणं हाविधेकिमिह० २ अपहरसिमधुरि
मद्रुमविकचमंजरी विघटयसिपटुघटनकीर्तिमि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पिसुंदरी ह्राविधे० ३ वर्धयसिकरुणरसमिलरद्प
हीयते विलुंपसिसकलह्रितमह्रिलमुपचीयते ह्राविधे
केकि० ४ मरुरवनिवलयमामलयमुपजायते मल
यजरजोपिजनवपुषिदहनायते ह्राविधेकि० ५
श्रवणपुटमथविरह्रितममृतधारया दिनमपिकथ-
लितमिदमिवतमसमालया ह्राविधे० ६ भुवन
मिदमद्यविगलदीपमनुभूयते दलितधनुरनुनृपति
रयमपिधूयते ह्राविधे० ७ भानुरितिवदतिकोपि
दुरितनिवारकं हरनामजयत्वलघुतरसिद्धिकार
कं ह्राविधेकिमिह० ८ ७ अष्टपदी १०

अगर्वोगर्वोभूदियमनुपमा काचिदुपमा गलश्रीरे
षाश्रीर्जगतिगुणहीनोगुणगणः विभूषानिर्भूषावि
घटितकलामन्मथकला कथंधानस्तातप्रसरतितेवै
षापरिणतिः १ विपत्सिंधुंबंधुं विगलितजलंनेत्र
युगलं सशोकंभूलोकंभुवनवलयंखेदनिलयं अ
नंगंनीरंगंविघटितधनंकोशभवनं विधातुंकिंधा
तस्तवद्दिनलज्जाप्रभवति २ सखिभिःअवसि
न्यस्तेहरनामाक्षरामृते लब्धसंवेदनातीव्रवेदनापु
नरब्रवीत ३ न्यस्तोमणिरुवयिमयासहजोनुरागः
साक्षीमनःसमजनिप्रतिभूर्मनोभूः प्राणप्रयासिय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दितत्परित्यज हंत क्रूरेण किं निगदितं रजनीकरेण ४ गो०
युगमिव दिवस प्रयासि वृध्दिं यदि संशाम्यति मे तवा
नुरागः त्वमिजगनितनोवधू विरोधी समुदयमेष्यति
नैषशीतरोचिः ५. रजनिविरहतापखेदखिन्नो निप
तासिवारि निधौस्वयंसुधांशो दवदहनखरैः करैर्वधू-
नां जनयसितापमितः किमालपामि ६ विराडीरांग
णगीयते विरचितविकसितबकुलवनेन वपुरपिप
लतिनमधुपवनेन उपदिशमेसखि किमुकलयामि
ध्रु० १ श्रुतिरपिनैषाबहुलमंदेन बधिरीभवतिमधु शिव०
पनिनदेन उपदिशमेसखि० २ अंधीभवतिनविपु १४

लसरेण नयनंकेतकधूलिभरेण उपदिशमे० ३
ज्वलतिन हृदयमिदंगहनेन कुपितकुसुमशरशर
दहनेन उपदिशमे० ४ मधुकरनिकरनिषेणघना
नि दुरितफलंकिमुदयतिवनानि उपदिश० ५ हिम
रुचिरनुलवमेषदुनोति हृदयपापमिवलक्ष्यतनोति
उपदिश० ६ तापकृशानुरनुक्षणमेति नयनजलाद
पिनैवबिभेति उपदिशमे० ७ सुकविभानुरितिनि
गदिति फलमचिरेणभविष्यतिभूरि उपदिशमे० ८
७. स्मरविरमविधेहिनग्रहारंमदुरसितिष्ठतिनिष्ठुरम
ईशः पुनरपिभविलापुरेवरस्याः परिणतपांडिममंडितः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कपोलः १ जानीमहेमहेशस्यमूर्तिर्मलयमारुतः शीत
स्त्रिजगतामुष्णोमंथ्यवकथमन्यथा २ वदंतिकामलेखाय
बाष्पधौतमुरवींसरवीं पार्वती कुर्वतीचिंतामनंतामिदमब्र-
वीत ३ जानातिकेवलंचेतो विरहव्याधिवेदनां अहोमे
दैववैगुण्यमेषलेखकरःकरः ४ अर्थंवक्तिविलोचनंयदि
यदिश्रोत्रंपुनःस्मारकंदेहोयद्युपदेशकारिलिखनंकुर्वीत
चेतोयदि संतापस्यलिपिर्भवेदपितदानिश्वासबाष्पोर्मि
भिः सामग्र्यालिखनस्यसुंदरि नचेद्धैर्यस्यमुत्पादयेत्
५ गौडीरागेणगीयते विलिखितुमितरदितरदिच्छामि शिव-
त्रिपुरवैरिवपुरेवलिखामि विलिखामिकिमतनुपीडि- १५

ता ग्रथममनुमथनगुणशीलिता ध्रु० १ भ्रमयदि
कवियोगविकारा विरहोयदिनप्रीतिरुदारा वि-
लिखामि० २ विरहोजीवनमितिचविरुद्धं किम-
पिविलिखितुमपिसंबंधं विलिखामि० ३ लपितं
कर्तुंयदिविज्ञानं तदपिवियोगजुषामज्ञानं विलिखा
मि० ४ अहमितिवेदनमितिपुनरुक्तं कथयकथय
सखिकिमपिनयुक्तं विलिखामि० ५ वदनंमलिनंव-
पुरितिविकलं जीवनशंसिकमिदमपिसकलं विलि
खामि० ६ समुचितमितिदयितंप्रतिदयिता प्रचल
तिपत्रारूढालिखिता विलिखामि० ७ वदतिभानुरि-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तिपरिहरचिंता मचिरादेवप्रभुरागंता ८ ७
विलिखामि० ध्रु० ७ अष्टपदीवारावी ७
तवबाणमसह्यीत्यायदिदूतिप्रयास्यति कथमा०
ख्यानुसंतापं रसनादाहशंकया १ तातक्षणं मदन
न हरप्रकामंमूर्छमनाक जननिदूरतएवतिष्ठ भ्रात
र्विमुंचनयनांबुजवारिपूरंवाचामियद्विलिखितंशशिशे
खराय २ झारेणबध्वाहरगुंफितेन मुद्रान्वितंमुद्रि
कयाविधाय चिरायनिःश्वस्यहरस्यलेखं सखीकरेप-
द्मसुखीबभार ३ इतिश्रीभानुदत्तकविविरचितेगी-
तगौरीपतौ अनंगलेखानामपंचमःसर्गः ५ ७

अथकनकसरोरुहालपत्रो विकसितकेतक विस्फुरत्
किरीटः नवविचिकिलकंचुकोपगूढः शिवमशिवैर्विशि
शिरैःस्मरोजघान १ स्कंदभ्रष्टभुजंगनायकश्रियागृण्ह
न्मृणालंकुरान् कंठश्रस्त हला हलावलिधियाकर्ष
न् हिरफावलिं नेत्रप्रांतपलायमानदहनभ्रांत्याहरन्
किंशुकं देवसानुभूधरस्यविहरन्नकापिलेभरतिं २
किमितरदपिवह्निलोचनंमे हृदि भवतीतिहरोविशंक-
मानः चकितचकितमीक्षयांबभूवस्मरशरपावकद्यू
यमानमंतः ३ उद्दामकामसंतापधाराधारालमानसः
संगतंभृंगिणंवाचमुवाचशशिशेखरः ४ भूपालरांग-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णगीयते चरणनखावलिरध्वनि वितरति किरणसुभ
संतानं लोचनकमलं विकिरति पतिरथ कलयति क
लपदद्वानं मदनमहीपतिभुवननिजयकरमचलसुता
तनुरूपं चेतसि चित्रितमिवनवचंपकरुचिरुचिरप्रतिरू
पं ध्रु० १ ऊरुयुगं किमुरंभायुगमिवमनवरत द्युति
पूरं वहति यतोमकरध्वजनरपति कीर्तिनिकरकर्पूरं
मदनमहीपति० २ रोमराजिरपि काचिदुदंचति दर्शि
तगुणसमुदाया मोहयितुंजगदखिलमुपेता किमुमकर
ध्वजमाया मदनमहीपति० ३ मानत्रितयं प्रसरतिम
ध्येनप्रत्यूहमानं रेखात्रयमितिमदनकृतं किमुवहति

वलित्रयभारं मदनमही० ४ कुचयुगमध्यगगन
मिदमपगतमवलोकितुमिवतारा प्रविचलमुक्ताहार
मिषादिव विचरतिकाचिदुदारा मदनमहीपति० ५
उपचयसमुचितमंबरमालोकितुमिवरभसनिधानं कु
चकनकाचलयुगमिदमाननमुन्नतमिवविदधानं मदन
महीपति० ६ चुचुकयुगमभिचारतरद्युतिजयतिपरम
कमनीयं मदननयनयुगतारायुगलंपुलकितयुगरमणी
यं मदनमहीपति० ७ वदतिभानुरितिकिमितरदपि
वाविधिनिरुपमनैपुण्यं मदनमहीपति० ८ ७
प्रतीमःपंचेषोःप्रमदकिरणःपंकजदृशो मद्दनिम्नेनाभी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सरसिरसकेलिंकलयतः ध्रुवंरोमश्रेणीकरकुहरविक्षि
प्तपयसो द्धिधाकाराधाराविरचयतिहारावलिरुचिं १
यदलच्छावण्यंदरतरलपंकेरुहदृशो रजोलग्नंमार्गे निप-
तितपदांभोरुहयुगल विनिर्मातुंशातक्रतवपुरपंकेरु-
हमुखी स्तदुच्छ व्यापारैरपहरतिमनसिजः २ अ० १३
केदाररागेणगीयते इंदुरखंडिसुधाभिरसृज्यतवचन
मनेकविलासं तस्यकणावितताइवविदधतिमुक्ताभूषण
भासं कथयामिकथंगिरिजादेहविधानं ध्रु० १ कनक
कल्पतरु विकसितकोरक कोमलकिरणवितानं ध्रु० १

मसमशरेणरचितमिवजयतिकनकताटंकं कथयामिक
थंगिरिजा० २ मुखगुणपटलंपटुविलिखितमथलेखि
निकामषिनीरं भोंछितमंजनरुचिकपटादिवकमलभु
वाकिमुधीरं कथयामिकथं० ३ मुखमालिंगतिचंद्र
धियाकिमुरजनिरधिकतरकामा लुन्नातिमिरावलिरि
वयदसौ भ्रूकपटादभिरामा कथयामिकथं० ४ मुख
तुलनाशैयेशीकिमुलांछनकृष्णाजिनपरिधानं धियति
तपस्यतिदूर्वारसमिवपिबतितिमिरभूमानं कथयामिक
थं० ५ रचयितुमुत्तमरचिमचलाधिपतनयाकुंतलभारं
किमकृतकंडितमेषमनोभवशिल्पीतिमिरमुदारं कथयामि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कथं० ६ तस्यचदिशिदिशिनिशितपवनरव निपतित
तुषसंतानं जनयतिजलधरमधुकरशैवलबर्हदलप्र-
तिमानं कथयामिकथं० ७ कविगणनाथसुतस्यक्ष
वेरितिवचनंत्रिजगतिधन्यं निगदतुकोवाविलिख-
तुकोवा शैलसुतालावण्यं कथयामिकथं ८ ७
अ० १४ तस्याःकांचनकंकणस्यरणितैर्गीतामृ-
तैर्नृत्यतो जानीमःकुसुमायुधस्यशिरसःस्रस्ताःप्रसू
नस्रजः व्याकीर्णंकिलतस्यनीलनलिनंचक्षुस्तिलं
नासिकाबंधूकंरदनच्छदोविजयतेकोंदचबृंदंरदाः १
सृष्टंबिंबाधरमभिनवंपल्लवंबंधुजीवं माणिक्यंवाय-

दकृतविधिर्धैर्यमित्थंप्रतीमः धारावारामिवनिपति
तातस्यबालार्करोचिर्वीचिस्निग्धाशिखरिदुहितुःप्रा
पसिंदूरशोभां २ इतिश्रीगीतगौरीपतौभानुदत्तविर
चितेषष्ठःसर्गः ६ ७

अंतःसंतापमार्तंडज्वालाज्वलितमानसः जयाजलधर
छायाप्रादुरासीत्पुरद्विषः १ प्राप्यशंभोःकरांभोजंले
खपत्रंनतभ्रुवः लिपिर्प्रीतिफलव्याजादिवरोमांचमादधे
२ रामगरीरांगेणगीयते त्वमसिकिरीटं त्वमसिप
टीरं त्वंसंतापहुताशनीरं जगदखिलंत्वयिलिखितं
लिखितं मनसिजलेखंत्वंममसकलं ध्रुव० १ प्रसरति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मलयजविपिनसमीरे रचयति धाटी मनसिजवीरे ज
गदखिलं त्वयि० २ पथिकवरसमजनि किमपिन दुरितं
तन्मेकेवलमनवधिसुकृतं जगदखिलं० ३ अभि
धेयंवाकिमितरदखिलं त्वयिकुशलिनिसकलंमम
कुशलं जगदखिलं० ४ मौलौस्खलितं कंठेगरलं
नयनेहुतवहतेजोबहलं जगदखिलं० ५ उरसिव-
सतिधरणीधरतनया तेननत्रमेनिवसत्वरया जगद
खिलं० ६ तत्रगतोवदनामितिसत्तं हृदिनियससि
मांवहसिनपुषितं जगदखिलं० ७ जयतिभानुरिति

लज्जालिखितं लघुलघुपुरहरविरचयचलितं जग
दखिलं त्वयि० ८ छ अष्टपदी १५
जयाचित्तदयांहेतोरब्रवीदिंदुशेखरं देव्यामदनसं
तापधोरवग्नितिर्बिंबिता १ हरविरहदीनदेहांशै-
लसुतांहंतुमभ्यस्यन विससूत्रंव्यसरेणुं लक्षीकुरु
तेमनोजन्मा २ पुरहरलवकामिनीभवानीतुहिनस
चोरजनीपुनःप्रियासो उभयमपिमंघोग्रयातिकाश्यं
तदुचितमेवविधुं दधासिमूर्ध्नि ३ विराडीरागेण
गीयते दिनकरमंडलं मिलितनिशाकरलेखादी
धितिशेषा विरहवारिनिधि विलुलितवडवादारुण
तापविशेषा सकलकलारसधन्या तवविरहे परित-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पति विषीदति विलपति गिरिपतिकन्या ध्रु० १ अभि
नवनीरजिनी कपटादिव जीवनमिद मतिभीतं मनसि-
जसायक वारकरेवटक मिव धारयतिस्मीतं सकलक-
लारस० २ शमनर्महिषचिररोमंथच्युतफेनपटलसंका
शं गणयतिकुंजमंजुकरुणद्रुमकोरकमुदितविकाशं
सकलकला० ३ वहतिसखीजनकरतलविनिहित
मभिनवसरसिजतालं स्मरकरिदशनमुरसिकिमुविलु
लितमविरलकोपकलापं सकलकला० ४ जीवनधन
हरणायसमीरणएष भवतिवनचारी तेनग्रहस्किइव
कचनिचयोविरचतिहृदिभयकारी सकलकला० ५

शिव० २१

मधुरपसरतुवहतुशुचिसंशय मितिगुरुतरमनवापं प-
यसिनभसिविपिनेभुविकलयतिनिश्वासैरधितापं सक
लकलारसधन्या० ६ कोकिलमलयसमीरसुधाकर
भूरिभयंकलयंती लिखतिशयनभुजंगविधुंतुदनाममहीधु
लुठंती सकल० ७ वदतिभानुरितिमुंचकथामितिलो
केरुपहसनीयं सकलज्ञाननिधौपुरवैरिणीदूतिकिम-
थकथनीयं सकलकलारस० ८ छ अ० १६
सुवर्णसुतनोरंगंतापस्तीव्रतनूनपात् सिंचसिंचपुरारते
कृपासलिलधारया १ जानीमःसुदृशोदृगंबुतटिनीव-
न्याभिरुत्सारितंयद्यत्तत्सकलंक्वचित्क्वचिदपिस्थित्यास

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मुन्मीलति भ्रूलीलास्मरकार्मुकं हिमकरं वक्त्रस्य की
लायितं चांचल्यंनयस श्रियः पुरहरत्वद्वाचमालंबते २
नाभीकूपधियामुरवंशशिधिया बाहूमृणालाशया
पाणीपल्लवशंकयावलिमपिप्रत्याशयास्तोत्सः क-
रूकेतककांतिकोमलरुचारंभाप्रकांडभ्रमान् संतोष
पिनिजोष्माभिः कवलितः प्रत्यंगमालिंगति ३, अ० १६
केदाररागेणगीयते जयतिनतारा बलमितिजीवनम
पिगमनंनविंतेने नयनयुगलजलमविरलजलधिजल
मुदकबिंदुमिवमेने सीदतिधरणीधरतनया सुधाक शिव
रकृतभूरिभया ध्रुव० १ प्रसरतितापगहनानर दहने २२

द्रवभीतिभिरभिरामं कनकवलयमपिकरमपहाय-
कचिदपिचलतिनिकामं सीदतिधरणी० २ बधा
नेवक्षमतेगंतुं कंपतेनवहंती हाटकरशनांरादिति
रणितेरहहभयंकलयंती सीदतिधरणी० ३ अश्रु
जलेनविलोचनयुगमपिरुधंनाथभवंतं दर्शनकामन
यास्नपयतिकिमुत्तदिर्पीठनिवसंतं सीदतिधरणी
धर० ४ लोचनजलरुद्धमूर्तिधियानवजलमाधिर
लमपिधत्ते घनतरतापहुताशनमपिनच्यूषमपिवि
सृजतिचित्ते सीदतिधरणी० ५ नयसिसुरभिदिव-
संमेकथमितिनलिनीपृच्छतिलोकं गमयतिसमयम-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रुजलविलुलित करतलनिहितकपोलं सीदति धर-
णीधर० ६ प्रचलतिहंसुमचलपतितनयामुपलक्ठि
नतरकर्मा लोचनजलकलशद्वय शकुनंपश्यतिचेतो
जन्मा सीदति धर० ७ भानुदत्तकविरितिगोचरयति
पुरहरनकुरुविलंबं दहति दहनइवहृदयमदयमिदमु
दयदमृतकरबिंबं सीदतिधरणी० ८ छ अ० १७
नीचैर्गतिदृशोनीरमधीरमितिसुभ्रुवः आयुर्लिपिःस्थिता
भालेभालेक्षण नशाम्यति १ बाष्पव्याजादमरतटिनी
लोचनाभ्यांगृहीता तापव्याजान्मनहुतभुक स्वीकृतो
मानसेन मोहव्याजाद्विषमपितयामुग्धयानीतमेव त्वं

मुक्तोभूत्त्रिपुरदहनकापिविश्राम्यतिष्ठ २ काननेसु-
भ्रुवःश्वासहुताशयासदूषिते अद्यापिषद्यद्व्याजात्का
लिमानोपशाम्यति ३ जयायाःकथितसाक्ष्यमिव
दातुंपुरद्विषे क्षणमालंबतस्थेर्ध्यमध्येऽक्रिमहसांपतिः
४ भ्रूछायांतर्विशतिनितरांनेत्रयोर्लक्ष्मपाली पक्ष्म
छायांश्रयतिनयनहंहमिंदीवराक्ष्याः कामःपार्श्वेभ्रमति
कुचयोस्तृष्णयास्वेदद्वारांश्रस्वेदांभस्तपतितरणौमाभि
कूपंश्रयाति ५ छायामृगीसमुद्दंडेचंडभासिभयातुरा
अन्योन्यमाश्रयीकर्तुमन्योन्यंवामनीयति ६ इतिश्रीभा
नुदत्तविरचितेगीतगौरीपतौसप्तमःसर्गः ७ छ शिवं.

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जयासंदर्शयामास श्रीनिपत्रंपुरद्विषः उद्योतिहसित ज्योतिरवादीच्चलुरंचयः १ मुंचमुंचचकोराक्षिमुख मंडलमानतं वासरःप्रसरत्सूरकरःपरिसमाप्यतां २ दिनमपिकियदस्तितिग्मरोचिः स्फुरतिकियानथयामि नीकदास्यात् इतिझटितिबहिःप्रयातित्वत्संतिकमुप यातिमुहुर्मुहुर्मृगाक्षी ३ दामप्रकामसुभगंशरदिं दुकल्पं तल्पंविहारभवनेमृगनाभिधूपैः आलीभिरे वसकलं विदधेपरंतुयामभ्युवाद्दिमनोरथाएवतेने ४ रागप्रबोलेस्तिमिरदिरेफैस्ताराप्रसूनेरुपशोभमाना आ शालतेवायतलोचनायाःसंध्यातमःकाचिदुपाजगामे ५ श्यामंबरभूरुहांकिशलयैःसंध्यारुचिच्छद्मना व्याप्तेनकिमुपप्लवंधुविरहव्यग्राहरिद्दारुणी तारास्तो मरुचिंवहंतियदमीवृंतेषुतेषामिवक्षीरक्षोदकलाप कोमलरुचोलग्नाःपयोबिंदवः ६ वारुण्याकिमुतिग्म भानुविरहव्याधिव्यथाखिन्नया संतापोपशमायकापि दलितारंभेतिसंभाव्यंते तस्यागर्भदलं निशाजगलितं पाथःपुनःकौमुदी कर्पूरं किमुतारकाहिमकरःकुंदंकि मुन्मीलति ७ रामगरीदेशाधसांमरीरंगेगीयंते किशलयशयनसुप्तशशिसुललितकरतलकृतमुखभा गा अनुदिनपुरहरचरणस्मरणप्रकटीभवदनुरागा द्द

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ष्टगौरीपुररिपुणाविकसितकुवलयलोचना ध्रुव० १
विधिकृतकुरुबककुसुमदृष्टिमिवघर्मजलं बिभ्राणा वि
लसदसनतरुपुनरंकुरमिवतनुपुलकं विदधाना दृष्ट
गौरी० २ प्रियतमशकुनमीनमिवलोचनमध्यनिकिम
पिनयंती अद्यभविष्यतिदयितविलोकनमितिचेत-
सिकलयंती दृष्टगौरी० ३ गिरिशमौलिशशिचकित-
तिमिरमिवचिकुरंसंयमयंती अमृतपयोनिधिविरह
मानमिवमानसमाकलयंती दृष्टगौरी० ४ त्वरितमुपे
हिचरमधरणीधरमितितपनायवदंती भुवनमलंकुरुन
कुरुविलंबनमितिरजनींनिगदंती दृष्टगौरी० ५ कथ

यितुमेतिगिरिशमितिपथिजनमाशुगतिंपश्यती किमु
कथयिष्यतिपतिमितिकर्णेजनयंसिन्यस्यंती दृष्ट-
गौरी० ६ वामविलोचननलिनस्पंदंसानंदंकलयंती
प्रियतमपथमपिकेलिनिकेतनमपिकपटेनभजंती दृ
ष्टगौरी० ७ भानुदत्तकविलपितमिदंशृणुनकृशमिमं
कुरुदेहं सुकृतमहीरुहफलमिदमुदयतिकिमितिव-
हसिसंदेहं ८ दृष्टगौरी० ८ ७ अ० १८

यामस्तेपुनरेवमस्तुवनिताबृंदस्यपुण्यप्रसूर्यत्राज्ञातच
रःसमेत्यशमयेद्धाधामगाधांप्रियः मातर्यामिनिमाषु
रेवजनयेः किंतुस्मरक्ष्मापतिर्ज्यानिर्घोषकठोरकोपदह

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नज्वालाजटालादिशः १ सांद्रानंदसुधास्यंदसंदो
ह्सुभगंवचः आलिःस्मरशरालीढमानसामिदमब्र-
वीत् अ० २६ कर्णाटरागेणगीयते विरचयहारं
प्रसरत्तुलारं मदनयशोमहनीयं फलमनवरतंकलय
तुरुष्कसंसकलभुवनकमनीयं विसृजविषादंमुंच
विषादं त्यजनिजमुखनिःश्वासं पतिरुपकंठेयोज
यकंठेदामकलयविश्वासं भु० १ लोचनकमलैरविर
लमिलैरर्चयमनसिजदेवं चंदनलिलैरपिदरहसि-
तैरनुलेपयबहुसेवं विसृजविषादं० २ सरसिज
वदनेकेलीसदनेरचयचरणविन्यासं इयमपिसहृ-

सइसासहहिममहसावहतिनिशापरिहासं विसृजवि० १
मु० ३ स्मरमदकरेण मुखहिमकिरणे कलयतिलकमव
दातं त्रिभुवनहारी हिमकरधारी सुखमाविशतुनिशांतं
विसृजविषादं० ४ नंदयसदयंपुरहरहृदयं जनय
विलोचनरंगं रतिरसनिलयं योजयवलयंनर्त्तयस
तमनंगं विसृजविषादं० ५ लोचनयुगलेनिर्ज्जित
कमले कुरुकज्जलमभिरामं मनसिजलघिमा खंज-
नमहिमा ह्यमपिभजतुविरामं विसृजविषादं ६
कुरुतांटंक ह्यमविशंकं स्मरशररभसनिधानं गुरु
भृगुमध्येनिवसतुमुग्धे विभुरिवभवतुज्ञानं विसृज

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विषादं० ७ इतिनिरवद्यंनिगदतिहृद्यंभानुरपाकु
रुखेदं पतिरुपगंतामधुरनुमंतापरिहरचेतसिभेदं
विसृजविषादं० ८ ७. कटाक्षकुसुमाजलिं
किरतिचक्षुरेणीदृशो मुखेंदुरमृतद्रवैर्विहसितैःपु
रःसिंचति स्वनैःकनकंमरवलापठतिकिंचनांदीमिमा
मुमापरिदृढेसमागतवतिस्मरोनृत्यति १ निर्दग्धंस्मा
स्यमेतस्याःसंतापशिखिधारया सिंदूरतिलकव्याजा
त्पुनरंकुरमाद्धे २ इतिश्रीभानुदत्तविरचितेगीतगो
रीपतौअष्टमःसर्गः ७ उक्ताभ्रूसंज्ञयानम्रमौलिना
चंद्रमौलिना पार्वतींबिभ्रतींमानमुच्चत्वरयाजया १

असारी रोगेणगीयते पतिरनुनयतिवदनिपट्टसततं
किमितरदपिवासुंदरिसुकृतं १ शंकरेमाकुरुकोपंक्षि
यपरे ध्रुव० १ शिवमवलोकयविरचयरवफलं सह-
जसुभगरुचिलोचनयुगलं शंकरे० २ उद्यतिपुलक
पटलमपिसतत पुररिपुरेषहसिष्यतिनियतं शंकरे० ३
जनुरपिदिनमपिलवमपिविफलं यत्रेत्रमणिचेलांचिक
लं शंकरे० ४ त्वमपिविमृशसखिसुचिरंमनसा
अभिमतमेवभविष्यतिसहसा शंकरे० ५ किमिति
नपश्यसिनिजवपुरलसं कर्मविधेयंपरिणतिसुरसं शं
करे० ६ शोणरुचिंनचविरचयवदने किमपिनसिध्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गी० २८

तिवैरिणिमदने शंकरे० ७ वदतिभानुकवि रिनिमधु
रजनी विहसतिमानवतीमदशमनी शंकरे० ८ ध्रु
प्राणेशस्यप्रभवतिमनः प्रेमहेमप्रसूनं चेतःश्रुतंदग
पिकमलंजीवनंबधुजीवं आशासूत्रेग्रथितमखिलं
वेधसानस्यभंगं स्यादेतेषामपिनियतनंगौरिमानंधि
मुंच १ दीर्घनिश्वसितंविधेहृियदसौप्रेमद्रुमोवेपते
वक्त्रंदर्शयजायतांस्मृतिभुवश्चंद्रानुकूलंदिनं गौरीभ्रू-
हृियदस्तिकोकिलकलकांणेर्वसंतभ्रमश्चक्षुर्विक्षिप
पुष्पवृष्टिरतनोमौलिरसमुन्मीलति २. आनंदकंदज

गो० शिव २८

गंदकवंद्येचंद्रेसमुन्मीलतिकुंदभासि पुरहिषामन्म
थराजधानी विस्तार्यपाणीजगदेकुमारी ३ सामेरीरा
गिणगीयते वदकिमपिजायतांममृतरसवाहिनी परि
णमतुमधुमधुरधारा तनुरतनुलीलयापुलकमवगा
हतांपदुरदनुममनयनतारा कमलदललोचनेविरचय
नरोषं मदनशरघातकोभवतितनुतापको वहसिकथ
मुरसिनतोषं ध्रुव० १ विरचयदृगंचलंस्मरसमर चंच-
लं हरकमलदलमधुरिमाणं विफलयमदालसंभ्रमर
मदमाधुरीं शिथिलयचकोरमहिमानं कमलदल० २.
लुलितमणिकुंडलंवदनशशिमंडलं किमितिविनमय
सिवद्रुवारं अथरजनिनायकोधृतललितखेटकोरचय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तुधरणीवल्लयचारं कमलदल० ३ इदमपिनयो
किकं सृजतिगजमौक्तिकं यदिदमपिनीलमरविंदं स्मि
तकिरणधारिणीममनयनपारिणीभवतियदिसुकृत
मपिबंधं कमलदलोचने० ४ कथमपिनमन्यसेम
दिकिंचिदीहसेगृह्णमुकुटमुहिनभासं कलयपरि
रंभणंरचयपरिचुंबनंदेहिरतिरसपरिहासं कमलद०
लो० ५ त्वमसिदृशिचंदिकात्वमसिदृशिमालिका
त्वमसिममचेतसिपटीरं सकलगुणसुंदरीप्रणयतरु
मंजरीत्वमसिक्षिपसिकरमधीरं कमलदलो० ६
यदिभवतिमानसीभीतिरतिह्रयसीकरोमिदूरमपिभ्रु

जंगं गरलमपनीयतेवह्निरपिपीयते तदपियदिवहसि
मयिरंगं कमलदल० ७ भानुकविभाषितं विविधगु
णालालितंश्रवसिकुरुमधुरपरिणामं मधुसमययामि
नीकमलमुखिवामिनी भवतिकृपयतिमभिरामं कम
लदलो० ८ ७ अ० २९ कृष्णःकेशकलापः
कामिन्सितवामनोमध्यः कथयकथंममशंभोरंतःसं-
तापमावहति १ दृष्ट्वाकापिचकोरंविकिरंतीगरलप
टलानि ज्ञानज्याकथमषाहेमहिमांशोःसुधाकीदृक् २
चेतसामिलितंचेतोवचसामिलितंवचः चक्षुषामिलि
तंचक्षुर्हीष्याकिमपराध्यते ३ इतिश्रीभानुदत्तविर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३० वसंतरागेणगीयते क्वचिदपिहसितं क्वचिदपि-
लपितं क्वचिदपिमदमाधुरी क्वचिदपिचलितंक्वचि
दपिमिलितं ग्रसरतिरतिचातुरी गिरिसद्मनिवहलं
शिवयोरिहकुतुहलं ध्रुव० १ पुररिपुरमलं विक
सितकमलं पटुकलयतिकुंतले स्मरशरशरणंक-
नकाभरणं वहतिवपुषिकोमले गिरिसद्मनि० २
मुखरितरशनं ग्रविचलवसनंतरलितमणिकुंडलं
गिरिपतितनयामनसिजकलयानमयतिमुखमंडलं शिव
गिरिसद्मनि० ३ मणिमयवलयंरभसोपचयं रचय ३०

तिपदभूषणं पतिरतिपुलकं कलयतितिलकं करम
धिगतदूषणं गिरिसद्मनि० ४ कौतुकलपितंतनु
तेलुलितंरतिचतुरिमसुंदरं पृथयतिनिभृतं गिरिजा
हसितंविकसितरुचिबंधुर गिरिसद्मनि० ५ स-
रभसवचनेमालारचनेरचयतिनखविघ्नहं कलय-
तिमधुरे रशनारशनेनिवसनंतु लघुविघ्नहं गिरि-
सद्मनि० ६ घटयतिवनितांकैतवकुपितापाटलु
रुचिलोचनं किमपिनमनुतेसुखमावृणुतेह्रिमरुचि
मदलोचनं गिरिसद्मनि० ७ कृतहरविनयोभानुः
सदयोनिगदतिह्रिकारणं ह्रिमकरमुकुटविज-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यिनिनिकेटविरचयनवधारणं गिरिसद्मनिवहलं० दे
ध्रु० ७ हारेकांविधियाशंभोजघनेकर्तुमिच्छति गौ
रीसहचरीवक्त्रेसस्मितंचक्षुरक्षिपत १ स्वैरंस्वैरमुदं
चितालहुतभुक्भोगिनक्षणंगम्यतां गंगेगच्छमना
कसुधाकरजटाजूटादेरलीयत्तां षायद्धमरावधूत
कमलस्पर्धाजुषाचक्षुषामांनिःशंकमुपत्यशैलतन
याद्दष्टुंसमाकांक्षति २ पुलकमुकुलभाजोरीशयाः
कामंकलीस्मितपरिचितगाढाश्लेषवाचालदोष्णोः
हिमरुचिसमुदंचत्कांतिधाराभिरामारतिरभसकल्पा
भिर्निर्जगामत्रियामा ३ अनंगरंगविच्छेदथारिणी

क्लेशकारिणि प्रभातेपुनरायाते भवानीभवमब्र
वीत् ४ अनुरागवशाच्चित्तमभिन्नीकृत्यकामिनोः
तनुनैकाकथंकारमकारिवतंवधसा ५ इतिशि
खरिसुतायावाच्यमाकर्ण्यकर्णामृतमिवविदधानः
सांद्रमानंदमतः वपुरकृतसमीराहारहाराभिरामं
पुलकमुकुटपालीचारुवेषामहेशः ६ धन्याशीरा
गेणगीयते रजतसुवर्णघटितशशिमंडलबंधुर
वदनविलासं द्रुतमंथरगतिकारणसकहेले चरण
युगुलविन्यासं अथशिवयोरेकंभजतवपुरतिसुंद
रं ध्रुव० १ अधिसीमंतमुदयदहिमद्युतिसुभगद्यु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तिसुंदरं फणिपतिरपिफणविगलितमणिरिति वि
मृशतिशशिमलिक्रूरं २ अथशिवयो० २ यति
फलितंवपुरनयोरुदयति कलयतजगदपिपूतं परि
कृतभागयुगुलमिव विपुल श्रीतिभिरेकीभूतं अथ
शिवयो० ३ इदमिदमुरगराजचिरनिपतितकंचुक
मितिबहुवारं पुरस्पिुरपसारयतिलुठिमगिरितनया
कुचतटहारं अथशिवयोरे० ४ दृढपरिरंभणमि
लितभसितमपि गिरिजाकुचघनसारं श्लोंछतिपश्य
तिपुलकतिविहसति लुभ्यतिपतिरविचारं अथशि
वयो० ५ पवनतरलतरसुरतटिनीजलफेनधिया

बहुकालं पुरारिपुरभिनवकुरुबककोरकदामसृज
तिविशालं अथशिवयोरे० ६ पश्यतिशैलसुताक
रकंकणमधिकरुचिरुचिपूरं स्वयमपिविहसतिवि
लसतिकलयतिभुजगराजकेयूरं अथशिवयो० ७
भानुदत्तकविरितिबहुविनयति विलसतुसकलंक
हं एकीभूतममृतकरशेखरभूधरतनयादहं अथ
शिवयो० ८ ७ अ०
आलीयंचरणंदधातिपुरतो निर्म्नोन्नतायांभुविस्वी
येनैवकरेणकर्षतितराःपुष्पंश्रमाशंकया तत्पेकिंच
मृगत्वचाविरचिते निद्रातिभोगेनिजैरंतःप्रेमभरालं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सःप्रियतमामंगेदधानोहरः १ अर्धंवक्षसिशैलरा
जदुहितुर्वक्षोरुहिस्पर्द्धितः संवीक्ष्यप्रतिबिंबमिंदु
सुभगे भोगनिजेवक्षसः स्वस्यापिस्तनमंडलांकुर
धियाव्यालोलमालोकयन् देवोदैन्यमपाकरोतुगिरि
जादेहार्धधारीहरः २ अक्षंमास्पृशमास्पृशप्रिय
विधेःपृष्ठात्मजंप्रेक्षकं द्यूतेसाक्षिणमीक्षणनविश
तोरन्योन्यदायंमुहुः ईषद्वक्रितपाशपातयुगपद्दृश्य
द्विदायोत्थितागौरीशंकरयोःपरस्परजयोत्कर्षोक्रमः
पातुवः ३ वीक्ष्याक्षंस्पृशभूतनाथगिरिजेतत्किंकि
मात्थस्वयं प्रेक्षस्वाथविधेःसुतंस्थितममुंप्रणथवात

पुनः इत्थंपाशकवक्रपातयुगपद्दृश्यद्विदायोस्थिता
गौरीशंकरयोःपरस्परजयोत्कर्षोक्रमःपातुवः ४ भ-
वानीवर्तितेयावदंगलग्नापुरद्विषः विद्वत्कंठस्थिता
तावद्वोनोवाणीविराजतां ५ इतिश्रीकविराजभानु
विरचितेगीतगौरीपतोशिवयोःपरमप्रमोदोनामदश
मःसर्गः १० अष्टपदीसंख्या २२ ७७ श्रीभवा
नीशंकरार्पणमस्तु ७ शिवं शिवं शिवम्
संवत १९५६ प्रमादीनामसंवत्सरे कार्तिककृष्ण दि
इंदुवार शके १८२३ श्रीसांबसदाशिवार्पणमस्तु
७ ७ ७ ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=05.08.19 16:35
,TRANSFERRED=2019/08/05 at 16:43:41
,PAGES=35
,TYPE=STD
,NAME=S0001319
,Book Name=M-151-GITGOORIPTI ASHTPDIROOP
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection